श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीभृगुसंहितोक्त

# ॥ श्रीसुदर्शन कवचम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

---

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीसुदर्शन कवचम् ॥

प्रसीद भगवन् ब्रह्मन् सर्वमन्त्रज्ञ नारद !।
सौदर्शनं तु कवचं पवित्रं ब्रूहि तत्वतः॥ १ ॥

नारद उवाच
शृणुष्वेह द्विजश्रेष्ठ ! पवित्रं परमाद्भुतम्।
सौदर्शनं तु कवचं दृष्टाऽदृष्टार्थसाधकम्॥ २ ॥

कवचस्यास्य ऋषिर्ब्रह्मा छन्दोऽनुष्टुप्तथा स्मृतम्।
सुदर्शनमहाविष्णुर्देवता संप्रचक्षते॥ ३ ॥

ह्रां बीजं शक्ति रत्रोक्ता ह्रीं क्रों कीलकमिष्यते।
शिरस्सुदर्शनः पातु ललाटं चक्रनायकः॥ ४ ॥

घ्राणं पातु महादैत्यरिपुरव्यात् दृशौ मम।
सहस्रारश्श्रुतिं पातु कपोलं देववल्लभः॥ ५ ॥

विश्वात्मा पातु मे वक्त्रं जिह्वां विद्यामयो हरिः।
कण्ठं पातु महाज्वालः स्कन्धौ दिव्यायुधेश्वरः॥ ६ ॥

भुजौ मे पातु विजयी करौ कैटभनाशनः।
षट्कोणसंस्थितः पातु हृदयं धाम मामकम्॥ ७ ॥

मध्यं पातु महावीर्यः त्रिणेत्रो नाभिमण्डलम्।
सर्वायुधमयः पातु कटिं श्रोणिं महाद्युतिः॥ ८ ॥

सोमसूर्याग्निनयनः ऊरू पातु च मामकौ।
गुह्यं पातु महामायो जानुनी तु जगत्पतिः॥ ९ ॥

जङ्घे पातु ममाजस्रं अहिर्बुध्न्यः सुपूजितः।
गुल्फौ पातु विशुद्धात्मा पादौ परपुरञ्जयः॥ १० ॥

सकलायुधसंपूर्णो निखिलाङ्गं सुदर्शनः।
य इदं कवचं दिव्यं परमानन्ददायिनम्॥ ११ ॥

सौदर्शनमिदं यो वै सदा शुद्धः पठेन्नरः।
तस्यार्थसिद्धिर्विपुला करस्था भवति ध्रुवम्॥ १२ ॥

कुश्माण्डचण्डभूताद्याः ये च दुष्टा ग्रहास्स्मृताः।
पलायन्तेऽनिशं भीताः वर्मणोऽस्य प्रभावतः॥ १३ ॥

कुष्ठापस्मारगुल्माद्याः व्याधयः कर्महेतुकाः।
नश्यन्त्ये तन्मन्त्रिताम्बुपानात् सप्तदिनावधि॥ १४ ॥

अनेन मन्त्रितां मृत्स्नां तुलसीमूलसंस्थिताम्।
ललाटे तिलकं कृत्वा मोहयेत् त्रिजगन्नरः।
वर्मणोऽस्य प्रभावेन सर्वान्कामानवाप्नुयात्॥ १५ ॥

॥ इति श्रीसुदर्शन कवचं संपूर्णम् ॥